गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। विराट्स्थाना, २१ त्रिष्टुप्

**श्रु॒धी हव॑मिन्द्र॒ मा रि॑षण्यः॒ स्याम॑ ते दा॒वने॒ वसू॑नाम्।**

**इ॒मा हि त्वामूर्जो॑ व॒र्धय॑न्ति वसू॒यवः॒ सिन्ध॑वो॒ न क्षर॑न्तः॥ २.०११.०१**

इन्द्र- परमेश्वर। इदि परमैश्वर्ये। इन्द्रः ईशनाधिदेवता। आधिभौतिके भावे वृष्टिप्रदा या ईशनशक्तिस्तस्या अधिदेवता। आध्यात्मिके इन्द्रियाणि वशीकृत्य या शक्तिरावरणाख्यबन्धानि व्यपोह्य मूलशक्तिधारा विमुच्य आत्मानं प्रदर्शयति सेन्द्रः। हवम्- आह्वानम्। श्रुधि- शृणु। मा रिषण्यः- मा हिंस्याः। ते- तव। वसूनाम्- सम्पदाम्। दावने- दाने। स्याम- भवेम। क्षरन्तः- स्रवन्त्यः। सिन्धवः- नद्यः। न- इव। वसूयवः- शरणकामाः। इमाः- एताः। ऊर्जाः- शक्तयः। त्वाम्- भवन्तम्। हि- खलु। वर्धयन्ति ॥१॥

**सृ॒जो म॒हीरि॑न्द्र॒ या अपि॑न्वः॒ परि॑ष्ठिता॒ अहि॑ना शू॒र पू॒र्वीः।**

**अम॑र्त्यं चिद्दा॒सं मन्य॑माना॒मवा॑भिनदु॒क्थैर्वा॑वृधा॒नः॥ २.०११.०२**

इन्द्र- ईशनाधिदैवत। शूर- समर्थ। पूर्वीः- सनातनीः। महीः- महतीरपो मूलशक्तिधाराः। अहिना- मेघेन जडेन। परिष्ठिताः- आवृताः। याः। अपिन्वः- अवर्धयः। ताः। सृजः- अमुञ्चः। उक्थैः- मन्त्रैः। वावृधानः- वृद्धः सन्। अमर्त्यं मन्यमानम्- स्वयमेव मृतिरहितमिति चिन्तयन्तम्। दासम्- उपक्षपयितारम्। अवाभिनत्- बिभेदिथ ॥२॥

**उ॒क्थेष्विन्नु शू॒र॒ येषु॑ चा॒कन्स्तोमे॑ष्विन्द्र रु॒द्रिये॑षु च।**

**तुभ्येदे॒ता यासु॑ मन्दसा॒नः प्र वा॒यवे॑ सिस्रते॒ न शु॒भ्राः॥ २.०११.०३**

इन्द्र- परमेश्वर। रुद्रियेषु- रुद्रदेवताकेषु। स्तोमेषु उक्थेषु- मन्त्रेषु। च। शूर- समर्थ। येषु। चाकन्- स्वस्थितिं कामयसे। यासु- यासु भावनासु च स्थितिं कामयसे। एताः- त एत उक्थास्ता

Dr. Rangaji

WEBOLIM

एता भावनाश्च। तुभ्य इत्- तवैव। मन्दसानः- तासु हृष्टो भवसि। शुभ्राः- ता दीप्तिमत्यो भावनाः। वायवे- प्राणाय। न- सम्प्रति। प्र सिस्रते- प्रसरन्ति ॥३॥

**शु॒भ्रं नु ते॒ शुष्मं॑ व॒र्धय॑न्तः शु॒भ्रं वज्रं॑ बा॒ह्वोर्दधा॑नाः।**
**शु॒भ्रस्त्वमि॑न्द्र वावृधा॒नो अ॒स्मे दासी॒र्विशः॒ सूर्ये॑ण सह्याः॥ २.०११.०४**

इन्द्र- परमेश्वर। ते- तव। शुष्मम्- बलम्। नु- क्षिप्रम्। शुभ्रम्- शुद्धम्। वर्धयन्तः। बाह्वोः- भुजयोः। शुभ्रम्- दीप्तम्। वज्रम्। दधानाः- धारयन्तो वयं भवेम। शुभ्रः- दीप्तः। त्वम्। वावृधानः- वर्धमानः। अस्मे- एतस्मै यजमानाय। दासीर्विशः- विषयदास्यभावनाः। सूर्येण- आत्मसूर्येण। सह्याः- अभिभव ॥४॥

**गुहा॑ हि॒तं गुह्यं॑ गू॒ळ्हम॒प्स्वपी॑वृतं मा॒यिनं॑ क्षि॒यन्त॑म्।**
**उ॒तो अ॒पो द्यां त॑स्त॒भ्वांस॒मह॒न्नहिं॑ शूर वी॒र्ये॑ण॥ २.०११.०५**

शूर- समर्थ। गुहा- रहस्यस्थाने अप्रज्ञायाम्। हितम्- अन्तर्हितम्। गूळ्हम्- मनसि गूढम्। अप्सु- जीवोदकेषु। अपीवृतम्- तिरोहितम्। क्षियन्तम्- निवसन्तम्। मायिनम्- सत्ये मिथ्याध्यासपरम्। उतो- अपि च। अपः- मूलशक्तिधाराः। द्याम्- चिदाकाशम्। तस्तभ्वांसम्- स्तम्भयन्तम्। वीर्येण- स्वविक्रमेण। अहिम्- सर्पोपलक्षितान्तर्हितदुर्वासनामयभावनम्। अहन्- बाधितवान् ॥५॥

**स्तवा॒ नु त॑ इन्द्र पू॒र्व्या म॒हान्यु॒त स्त॑वाम॒ नूत॑ना कृ॒तानि॑।**
**स्तवा॒ वज्रं॑ बा॒ह्वोरु॒शन्तं॒ स्तवा॒ हरी॒ सूर्य॑स्य के॒तू॥ २.०११.०६**

इन्द्र- परमेश्वर। ते- तव। पूर्व्या- प्राचीनानि। महानि- महान्ति कर्माणि। नु- क्षिप्रम्। स्तव- स्तवाम। उत- अपि च। नूतना- अभिनवानि। कृतानि- कर्माणि। स्तवाम। बाह्वोः- त्वद्भुजयोः।

Dr. Rangaji
WEBOLIM

उशन्तम्- दीप्यमानम्। वज्रम्। स्तव- स्तवाम। सूर्यस्य- आत्मनः। केतू- प्रज्ञापकौ। हरी- तवाश्वभूतप्राणशक्ती। स्तव- स्तवाम ॥६॥

**हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम्।**
**वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन्॥ २.०११.०७**

इन्द्र- परमेश्वर। नु- क्षिप्रम्। ते- तव। हरीः- आकर्षणशक्तिप्रतीकाश्वौ। वाजयन्तौ- गतिमन्तौ। घृतश्चुतम्- उदकच्यावकम्। स्वारम्- शब्दम्। अस्वार्ष्टां- शब्दितवन्तौ। समना- तयोः सहृदया। भूमिः- पृथिवी। अप्रथिष्टाः- प्रथिताभवत्। आध्यात्मिके तु चित्ताकाशस्थप्राणः जीवोदकधारा आशरीरं प्रवर्तयिष्य इति प्रकटयति। भूः शरीरञ्च तदर्थं सज्जं भवतीति भावः। सरिष्यन्- सरन्। पर्वतश्चित्- मेघोपि। अरंस्त- अरमत। अपां मूलशक्तिधाराणामुपलब्धिस्थानञ्च तन्निष्पादनाय सरतीत्याध्यात्मिके। सर्वमिन्द्रानुग्रहेण भवतीति भावः।॥७॥

**नि पर्वतः साद्यप्रयुच्छन्सं मातृभिर्वावशानो अक्रान्।**
**दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि॥ २.०११.०८**

अप्रयुच्छन्- अप्रमाद्यन्। पर्वतः- मेघः। नि सादि- न्यषीदत्। मातृभिः- अद्भिः। वावशानः- शब्दं कुर्वन्। अक्रान्- अक्रमीत्। मूलशक्तिधाराः स्त्रावयितुं तदुपलब्धिस्थानमिन्द्रप्रसादेन प्रवर्तत इत्याध्यात्मिके। दूरे पारे वाणीम् वर्धयन्तः- अन्तरिक्षपर्यन्तं मन्त्रं वर्धयन्त उपासकाः। इन्द्रेषिताम्- इन्द्रप्रेरिताम्। धमनिम्- वाचम्। नि पप्रथन्- नितरामप्रथयन्॥८॥

**इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः।**
**अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात्॥ २.०११.०९**

इन्द्रः। महाम्- महत्याः। सिन्धुम्- अपः। वृत्रम्- आवारकम्। आशयानम्- तमःप्रायम्। मायाविनम्- मिथ्याप्रवृत्तम्। निः अस्फुरत्- जघान। कनिक्रदतः- गर्जतः। वृष्णः-

Dr. Rangaji
WEBOLIM

वर्षकस्येन्द्रस्य। अस्य- एतस्य। वज्रात्। रोदसी- द्यावापृथिव्यौ। भियाने- भीते। अरेजेताम्- अकम्पेताम्॥९॥

**अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वात्।**

**नि मायिनो दानवस्य माया अपादयत्पपिवान्सुतस्य॥ २.०११.१०**

अस्य- एतस्य। वृष्णः- वर्षकस्येन्द्रस्य। वज्रः। अरोरवीत्- अशब्दयत्। अमानुषम्- अविवेकिनम्। मानुषः- विवेकीन्द्रः। निजूर्वात्- नितरां जिघांसति। सुतस्य पपिवान्- रसानुभवकरः। मायिनः- वञ्चकस्य। दानवस्य- वृत्रस्य। मायाः। अपादयत्- नाशितवान्॥१०॥

**पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः।**

**पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव॥ २.०११.११**

शूर- समर्थ। इन्द्र- परमेश्वर। सोमम्- रसम्। पिब पिब- अनुभव। मन्दिनः- आनन्ददाः। सुतासः- निष्पन्ना रसाः। त्वा- भवन्तम्। मन्दन्तु- आनन्दयन्तु। ते- तव। कुक्षी- हृदयम्। पृणन्तः- पूरयन्तः। वर्धयन्तु। इत्था- एवम्। पौरः- पूरकः। सुतः- निष्पन्नो रसः। इन्द्रम्- परमेश्वरम्। आव- तर्पयतु॥११॥

**त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः।**

**अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम॥ २.०११.१२**

विप्राः- मेधाविनो वयम्। त्वे- त्वयि। इन्द्र। अभूम- भवेम। धियम्- बुद्धिम्। वनेम- सम्भजेम। ऋतया- धर्मकामनया। सपन्तः- परिचरन्तः। अवस्यवः- रक्षाकामाः। प्रशस्तिम्- त्वत्कीर्तिम्। धीमहि- ध्यायामः। सद्यः- क्षणेन। ते- तव। रायः- सम्पदः। दावने- दाने। स्याम- भवेम॥१२॥

**स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः।**

**शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम्॥ २.०११.१३**

Dr. Rangaji

WEBOLIM

इन्द्र- परमेश्वर। ये। ते- तव। ऊती- प्राप्त्या। ऊर्जं- प्राणम्। वर्धयन्तः। ते। ते- तव। स्याम- भवेम। देव- हे द्योतनशील। यम्- याम्। चकानाम- कामयामः। रयिम्- तां दानयोग्यसम्पदम्। शुष्मिन्तमम्- अतिशयेन बलवतीम्। वीरवन्तम्- वीर्ययुक्ताम्। रासि- ददासि ॥१३॥

**रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः।**

**सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम्॥ २.०११.१४**

नः- अस्मभ्यम्। क्षयम्- निवासम्। रासि- प्रयच्छसि। अस्मे- अस्माकम्। मित्रम्- स्नेहम्। रासि। इन्द्र। मरुतां शर्धः- मरुद्गणं रासि। सजोषसः- सहृदयाः। ये च। मन्दसानाः- तुष्यन्तः। वायवः- प्राणा मरुतः। अग्रणीतिम्- अग्रे नीतं सोमं रसम्। पान्तु- अनुभवन्तु ॥१४॥

**व्यन्त्विन्नु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र।**

**अस्मान्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः॥ २.०११.१५**

येषु। मन्दसानः- त्वं तुष्यसि। ते मरुतः प्राणविशेषाः। व्यन्तु- रसमनुभवन्तु। द्रह्यत्- आत्मानं दृढीकुर्वन्। इन्द्र। तृपत्- तर्पकम्। सोमम्- रसम्। पाहि- अनुभव। पृत्सु- पृतनासु। अस्मान्- नः। सु- सुष्ठु। तरुत्र- तारक। बृहद्भिः- महद्भिः। अर्कैः- पूज्यैर्मरुद्भिः प्राणविशेषैः। द्याम्- नभः। अवर्धयः ॥१५॥

**बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान्।**

**स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन्॥ २.०११.१६**

तरुत्र- तारक। इन्द्र- ईशानाधिदैवत। ये। बृहन्तः- महान्तः। सुम्नम्- सुखकरं त्वाम्। नु- क्षिप्रम्। उक्थेभिः- मन्त्रैः। आविवासान्- परिचरन्ति। ते। बर्हिः स्तृणानासः- लब्धभूमिकाः। त्वोताः- त्वद्रक्षिताः। पस्त्यावत्- शरणवत्। वाजम्- भोगम्। अग्मन्- प्राप्नुवन्ति ॥१६॥

**उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र।**

**प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम्॥ २.०११.१७**

Dr.Rangaji
WEBOLIM

शूर- समर्थ। मन्दसानः- हृष्टः सन्। नु- क्षिप्रम्। उग्रेषु- उद्गूर्णेषु। त्रिकद्रुकेषु- त्रिस्थानेषु भूर्भुवःसुवर्लोकाख्यमनःप्राणशरीरेषु। इन्द्र। सोमम्- रसम्। पाहि- अनुभव। प्रीणानः- प्रीतः सन्। श्मश्रुषु- श्मश्रूणि। प्रदोधुवत्- कम्पयन्। हरिभ्याम्- तवाश्वाभ्यां प्राणप्रतीकाभ्याम्। सुतस्य- निष्पन्नस्य रसस्य। पीतिम्- अनुभूतिं प्रति। याहि- गच्छ ॥१७॥

**धि॒ष्वा शवः॑ शूर॒ येन॑ वृ॒त्रम॒वाभि॑न॒द्दानु॑मौर्णवा॒भम्।**

**अपा॑वृणो॒र्ज्योति॒राया॑य॒ नि स॑व्य॒तः सा॑दि॒ दस्यु॒रिन्द्र॥ २.०११.१८**

शूर- समर्थ। इन्द्र- परमेश्वर। येन। और्णवाभम्- ऊर्णनाभिमिव बन्धकम्। दानुम्- अवखण्डनं कुर्वन्तम्। दो अवखण्डने। वृत्रम्- आवरणम्। अवाभिनत्- बिभेदिथ। शवः- तद्बलम्। धिष्व- धारय। आर्याय- आर्यशीलाय। ज्योतिः। अपावृणोत्- उद्घाटितवान्। दस्युः- उपक्षपयिता। सव्यतः। नि सादि- नितरां पातितः सूदितश्च ॥१८॥

**सने॑म॒ ये त॑ ऊ॒तिभि॒स्तर॑न्तो॒ विश्वाः॒ स्पृध॒ आर्ये॑ण॒ दस्यू॑न्।**

**अ॒स्मभ्यं॒ तत्त्वा॒ष्ट्रं वि॒श्वरू॑प॒मर॑न्धयः सा॒ख्यस्य॑ त्रि॒ताय॑॥ २.०११.१९**

ये। ते- तव। ऊतिभिः- रक्षाभिः। विश्वाः- सर्वाः। स्पृधः- स्पर्धाभावनाः। दस्यून्- दस्युभावनाः। आर्येण- आर्यशीलेन। तरन्तः- तरन्ति तान्। सनेम- सम्भजेम। त्रिताय- भूर्भुवःसुवराख्यभूमिकात्रयस्थतत्त्वोपासकाय। साख्यस्य- तत्सखित्त्वं पालयितुम्। अस्मभ्यम्- अस्मदर्थम्। विश्वरूपम्- बहुरूपम्। तत्त्वाष्ट्रम्- सुशिल्पिनिर्मितं दुर्गं तदुपलक्षितान्तरायम्। अरन्धयः- नाशितवान् ॥१९॥

**अ॒स्य सु॑वा॒नस्य॑ म॒न्दिन॑स्त्रि॒तस्य॒ न्यर्बु॑दं वावृधा॒नो अ॑स्तः।**

**अव॑र्तय॒त्सूर्यो॒ न च॒क्रं भि॒नद्व॒लमिन्द्रो॒ अङ्गि॑रस्वान्॥ २.०११.२०**

Dr. Ranganji

WEBOLIM

वावृधानः- वर्धमानः। अस्य- एतस्य। सुवानस्य- रसनिष्पादकस्य। मन्दिनः- रसयुक्तस्य। त्रितस्य- उपासकस्य। न्यर्बुदम्- मेघं जडप्रतीकम्। नि अस्तः- बिभेद। सूर्यः- सविता। न- इव। चक्रम्- स्वतेजोमयमण्डलम्। अवर्तयत्- अभ्रमयत्। इन्द्रः। अङ्गिरस्वान्- अग्नियुक्तः। वलम्- बन्धकम्। भिनत्- बिभेद ॥२०॥

**नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यदि॑न्द्र॒ दक्षि॑णा म॒घोनी॑।**
**शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑॥ २.०११.२१**

नूनम्- निश्चयेन। इन्द्र। सा। दक्षिणा- समर्था। मघोनी- उषा विद्या। ते वरम्- त्वदनुग्रहम्। जरित्रे- रसनिष्पादकाय। प्रति दुहीयत्- प्रति दोग्धि। स्तोतृभ्यः। शिक्ष- विद्यां देहि। नः- अस्माकम्। भगः- सौभाग्यम्। अति मा धक्- अस्मद्बुद्धिग्रहणमतिक्रम्य मा देहि। यथायोग्यमेव देहि। यासु विद्यासु वयमनधिकारिणस्ता मा देहीति भावः। विदथे- यज्ञे। सुवीराः- शोभनवीर्यसम्पन्नाः सन्तः। बृहत्- महत्। वदेम- ब्रवाम ॥२१॥

Dr. Rangaji

WEBOLIM